**M. A. SANSKRIT (PREVIOUS), FIRST SEMESTER**

**COURSE CODE : SKT-HC-101**

## प्रथमपत्रम् : संहिता उपनिषत् च

**Paper-I : Samhita Upanisat Cha**

Co. 101. I : अस्मिन् घटके वयं ऋग्वेदीयसूक्तेभ्यः अग्नि-सविता-विष्णु-इन्द्रादिदेवतानां स्वरूपं ज्ञास्यामः। तेन सहैव वैदिकधर्मसमाजसंस्कृतेरपि बोधो भवति।

Co. 101. II : एतस्मिन् घटके वर्णितसूक्तानां माध्यमेन सृष्टिप्रक्रियायाः, संवादसूक्तानां रुचिकरपद्धत्या प्रकृतेर्गूढतत्त्वानां ज्ञानं भवति।

Co. 101. III : यजुर्वेदीयशिवसंकल्पसूक्तस्य माध्यमेन छात्राः मनसः स्वरूपमवगच्छन्ति, मातृभूमिसूक्तेन च स्व मातृभूमिं प्रति स्वकर्त्तव्यमवबुधयन्ते।

Co. 101. IV : ईशावास्योपनिषदः अध्ययनेन छात्रैः परमात्मनः स्वरूपावबोधः, विद्या-अविद्यायाश्च ज्ञानं प्राप्यते।

**COURSE CODE : SKT-HC-102**

## द्वितीयपत्रम् : व्याकरणम् भाषाविज्ञानम् च (1)

**Paper-II : Vyakaranam Bhasavijnanam Cha (1)**

Co–HC–102 : I : अस्मिन् घटके लघुसिद्धान्तकौमुद्यनुसारं सञ्ज्ञानप्रकरणं, सन्धिप्रकरणस्य अच्सन्धिप्रकरणतः विसर्गसन्धिप्रकरणपर्यन्तं सोदाहरणं सूत्रोल्लेखपूर्वकं च रूपसिद्धिप्रक्रियया छात्राः परिचिताः भवन्ति।

Co–HC–102 : II : अस्मिन् लघुसिद्धान्तकौमुद्याः दृशा सुबन्तप्रकरणान्तर्गतं अजन्तशब्दानां स्त्रीलिङ्ग-पुल्लिङ्ग-नपुंसकलिङ्गस्य कतिपय शब्दाः, कतिपय हलन्तपुल्लिङ्गशब्दाश्च पाठ्यन्ते।

Co–HC–102 : III : लघुसिद्धान्तदृष्ट्या भ्वादिगणस्य भू-एध् धात्वोः सूत्रोल्लेखपूर्विका दशगणानां सिद्धिप्रक्रिया प्रदर्श्यते। अन्यच्चास्मिन्नेव पूर्वकृदन्तप्रकरणमपि व्याख्यापूर्वकमध्याप्यते।

Co–HC–102 : IV : एतस्मिन् घटके भाषाविज्ञानस्य परिभाषा, क्षेत्रं, भाषागतपरिवर्तनं, तद्भेदाः, भाषापरिवर्तनस्य कारणानि, भाषाणां वर्गीकरणं च इत्येतान् छात्राः ज्ञास्यन्ते। अन्यच्च भाषापरिवारान्तर्गतं भारोपीयभाषापरिवारस्य प्रमुखवैशिष्ट्यं तद्भेदान् चावुध्यन्ते।

## COURSE CODE : SKT-HC-103

## तृतीयपत्रम् : भारतीयदर्शनम् (1)

**Paper-III : Bharatiyadarshanam (1)**

CO–SKT–HC–103 – 1 तर्कभाषा – निबन्धात्मक प्रश्नः

न्यायदर्शनस्य प्रकरणग्रन्थः केशवमिश्रप्रणीता तर्कभाषा न्यायदर्शने प्रवेशं प्राप्तुं विरचितः उत्कृष्टग्रन्थः अस्ति। अस्य प्रमाणभागे वर्णितानि प्रमाणानि अधिकृत्य निबन्धालेखनं छात्राणां विषयपारायणं प्रदर्शयति, लेखनप्रतिभां च विवर्धयति।

CO–SKT–HC–103 – 2 तर्कभाषा – पंक्तिव्याख्या

तर्कभाषायाः गद्यपंक्तीनां सप्रसंगव्याख्या विषयस्य सूक्ष्माध्ययनार्थं समाविष्ट।

CO–SKT–HC–103 – 3 सांख्यकारिका – निबन्धात्मक प्रश्नः

ईश्वरकृष्णविरचितायां सांख्यकारिकायां सांख्यदर्शनस्य सर्वे सिद्धान्ताः निरूपिताः। तत्र छात्राणां लेखनप्रतिभायाः विकासार्थं निबन्धात्मकः प्रश्नः सम्मिलितः।

CO–SKT–HC–103 – 4 सांख्यकारिका – कारिकाव्याख्या

प्रत्येकं कारिकायाः सूक्ष्माध्ययनार्थं वस्तुनिष्ठतां प्रतिपादनार्थं च सप्रसंगकारिकाव्याख्या अपेक्षिता।

## COURSE CODE : SKT-HC-104

## चतुर्थपत्रम् : काव्यम् नाटकम् च

**Paper-IV : Kavyam Natakam Cha**

CO–HC–104 : I : घटकेऽस्मिन् “माघे सन्ति त्रयो गुणाः” इत्येतेन सह महाभारतस्य सन्दर्भेण शिशुपालवधस्य महाकाव्यत्वं परिचीयते। तदनन्तरं श्लोकव्याख्याऽभिधीयते।

CO–HC–104 : II : रामायणस्याकरग्रन्थत्वेन सार्धं नाटकस्योत्तरकालीनमुदन्तं शिक्ष्यते। सन्धयङ्गान्यपि व्याख्याभागे सम्यक्पाठ्यन्ते।

CO–HC–104 : III : कविसम्बद्धा अथ च ग्रन्थसम्बद्धा समालोचनाङस्मिन् घटके विधीयते। आलोचनात्मका प्रश्नाः स्थानभाजः जायन्ते।

CO–HC–104 : IV : सामान्येन कालिदासस्य परिचयेन समेतं मेघदूतस्य खण्डकाव्यत्वं यद्वा गीतिकाव्यत्वं शापयुतेन कथानकेन व्याख्यया च सम्पाद्यते संस्कृतमाध्यमेन ।

### COURSE CODE : SKT-HC-105

### पञ्चमपत्रम् : धर्मतन्त्रागमः (1)

**Paper-V : Dharmatantragamah (1)**

CO–SKT–HC–105 – 1 मनुस्मृतिः (प्रथमोऽध्यायः) -

मनुस्मृतेः प्रथमे अध्याये सृष्ट्युत्पत्तेः, चतुर्युगानां, ब्राह्मण-क्षत्रिय-वैश्य-शूद्र-वर्णानां, तेषां कर्तव्यानां च विस्तृतं वर्णनमस्ति। एतदाश्रित्य संस्कृतमाध्यमेन निबन्धलेखनेन विषयस्य प्रतिपादन-सामर्थ्येन सह भाषाज्ञानमपि वर्धते। मनुस्मृतेः कुल्लूकभट्टकृतव्याख्या प्राचीनतमा एवं प्रामाणिकतमा वर्तते, अतएव अस्याः आलोकेन अध्ययनं संकलितम्।

CO–SKT–HC–105 – 2 मनुस्मृतिः (द्वितीयोऽध्यायः) -

अस्मिन्नध्याये वैदिक-वर्णाश्रमधर्म-व्यवस्थायाः वर्णनं, तेषां व्रतचर्यायाः, संस्काराणां च प्रतिपादनं संस्कारविधिसहितं विद्यते। अस्य अध्यनेन छात्राः वैदिकधर्मस्य परिचयं प्राप्नुवन्ति।

CO–SKT–HC–105 – 3 चाणक्यसूत्राणि

चाणक्यसूत्राणि कौटिल्यस्य अर्थशास्त्रे परिशिष्टरूपेणसंकलितानि सन्ति। तेषु मानवधर्मः, राजनीतिः, दण्डनीतिः, सत्यस्य महिमा, शत्रुमित्रभेदः, शीलस्य महत्त्वं, धर्मार्थकामानां महत्त्वादिविषयाः सूत्रिताः। तेषामध्ययनेन व्यावहारिकं ज्ञानं वर्धते।

CO–SKT–HC–105 – 4 चाणक्यसूत्राणि

चाणक्यसूत्राणां सप्रसंगव्याख्या सूक्ष्माध्ययनार्थं वस्तुनिष्ठप्रतिपादनार्थञ्च अपेक्षिता।

## एम॰ ए॰ संस्कृतम् (प्रथमं वर्षम्), द्वितीयं सत्रम्

### M. A. SANSKRIT (PREVIOUS), SECOND SEMESTER
### COURSE CODE : SKT-HC-201

### षष्ठपत्रम् : ब्राह्मणम् वेदाङ्गानि च

**Paper-VI : Brahmanam Vedangani Cha**

Co. 201. I : ऐतरेयब्राह्मणस्य शुनः शेपाख्यानेन पुत्रस्य महत्त्वं, सततप्रयत्नशीलतायाः शिक्षा, राजसूययज्ञस्य विषयश्च ज्ञायते।

Co. 201. II : निरुक्तशास्त्रस्य मुख्यप्रयोजनम्, निघण्टौ संकलितशब्दानामर्थः प्रकृतिप्रत्यययोः दृष्ट्या निर्वचनम् इत्येते विषयाः सन्ति। अस्मिन् घटके छात्राः मुख्यरूपेण निर्वचनसिद्धान्तान् ज्ञास्यन्ति।

Co. 201. III : एतस्मिन् घटके देवतायाः परिभाषा, ऋचां भेदाः, देवतानां आकारः, प्रमुखछन्दसां ज्ञानम् इत्येतैः विषयैः छात्राः परिचिताः भविष्यन्ति।

Co. 201. IV : वैदिकभाषायाः अवबोधार्थं वैदिकव्याकरणस्यावश्यकता भवति। एतस्मिन् घटके वैदिकव्याकरणस्य बोधो छात्रैः क्रियते।

## COURSE CODE : SKT-HC-202

## सप्तमपत्रम् : व्याकरणम् भाषाविज्ञानम् च (2)

### Paper-VII : Vyakaranam Bhasavijnanam Cha (2)

Co. 202. I : अस्मिन् घटके लघुसिद्धान्तकौमुद्यानुसारं अदादिगणस्य अद्-अस् धात्वोः सिद्धिप्रक्रिया अवबोधयिष्यते। अस्मिन्नेव नामधातुप्रकरणं आत्मनेपदप्रक्रिया परस्मैपदप्रक्रिया च विधास्यते ।

Co. 202. II : घटकेऽस्मिन् लघुसिद्धान्तकौमुद्यानुसारं समासप्रकरणं तद्धितप्रकरणं च बोधयिष्यते।

Co. 202. III : अस्मिन् घटके सिद्धान्तकौमुद्यानुसारं कारकप्रकरणं कारकविभक्तिप्रतिपादनपूर्वकं कारयिष्यते।

Co. 202. IV : घटकेऽस्मिन् अर्थविज्ञानम्, ध्वनिविज्ञानम्, रूपविज्ञानम्, वाक्यविज्ञानम् इत्येतानि भाषाविज्ञानप्रकरणानि अवबोधयिष्यन्ते।

## COURSE CODE : SKT-HC-203

## अष्टमपत्रम् : भारतीयदर्शनम् (2)

### Paper-VIII : Bharatiyadarshanam (2)

CO–SKT–HC–203 – 1 अर्थसंग्रहः - निबन्धात्मकप्रश्नः

पूर्वमीमांसादर्शनस्य प्रकरणग्रन्थः लौगाक्षिभास्करप्रणीतः अर्थसंग्रहः पूर्वमीमांसादर्शने प्रवेशं कारयितुं विरचितः उत्कृष्टग्रन्थः अस्ति। अत्र वर्णितानां विधिनिषेधादीन् अधिकृत्य निबन्धलेखनं छात्राणां मीमांसादर्शने वेदवाक्यीवाजनरूपविषयपारायणं प्रदर्शयति, लेखनप्रतिभां च विवर्धयति।

CO–SKT–HC–203 – 2 अर्थसंग्रहः - पंक्तिव्याख्या

अर्थसंग्रहस्य गद्यपंक्तीनां सप्रसंगव्याख्या विषयस्य सूक्ष्माध्ययनार्थं समाविष्टा।

CO–SKT–HC–203 – 3 वेदान्तसारः - निबन्धात्मकप्रश्नः

सदानन्दयोगीन्द्रविरचितः वेदान्तसारः वेदान्तदर्शनस्य एकः प्रसिद्धः प्रकरणग्रन्थः अस्ति। अस्मिन् शांकराद्वैतवेदान्तस्य प्रमुखसिद्धान्ताः अध्यारोपापवादन्यायेन निरूपिताः। छात्राणां लेखनप्रतिभायाः विकासार्थं निबन्धात्मकः प्रश्नः सम्मिलितः।

CO–SKT–HC–203 – 4 वेदान्तसारः – गद्यपंक्तिव्याख्या

शांकराद्वैतवेदान्तस्य सूक्ष्माध्ययनार्थं वस्तुनिष्ठतां प्रतिपादनार्थं च सप्रसंगगद्यपंक्तिव्याख्या अपेक्षिता।

## COURSE CODE : SKT-HC-204

## नवमपत्रम् : काव्यम् काव्यशास्त्रम् च

### Paper-IX : Kavyam Kavyashastram Cha

Co–HC–204 : I : प्रथितगद्यकारस्य बाणस्य सामान्यपरिचयेन सह गद्यमहाकाव्ये 'कादम्बरी' इत्यभिधे महाश्वेतायाः वृत्तं 'वृत्तगन्धोज्झितं गद्यम्' यद्वा 'ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्' इति प्रदर्शनेन व्युत्पत्त्या व्याख्यायते।

Co–HC–204 : II : प्रारम्भिकसन्दर्भेण सन्देशवाहके दौत्कर्मणि भौगोलिकत्वं मार्गनिर्देशनञ्च व्युत्पत्त्या व्याख्यायते। पर्वतैः नदीभिश्च विद्यार्थिनः परिचिताः भवन्ति। माध्यममत्र संस्कृतं भवति।

Co–HC–204 : III : काव्यशास्त्रं काव्यस्य प्राणभूतम्। तेनैव च काव्यलक्षणं गुणदोषविवेचनञ्च प्रतिपाद्यते। पदपरिचयेन सह काव्यस्माभिधाशक्तिरवगम्यते विद्यार्थिभिः।

Co–HC–204 : IV : लक्षणा-व्यञ्जनानिरूपणं तत्सम्बद्धैश्च विवेचनात्मकैः प्रश्नैः विषयप्रतिपादनं विधीयते। एतेन विद्यार्थिभ्यः काव्यशास्त्रस्य ज्ञानं प्रदीयते।

## COURSE CODE : SKT-HC-205

## दशमपत्रम् : धर्मतन्त्रागमः (2)

### Paper-X : Dharmatantragamah (2)

CO–SKT–HC–205 – 1 प्रत्यभिज्ञाहृदयम्

क्षेमेन्द्रविरचितं प्रत्यभिज्ञाहृदयम् अद्वैतशैवसम्प्रदायस्य विशेषरूपेण प्रत्यभिज्ञादर्शनस्य प्रसिद्धः ग्रन्थः अस्ति। अस्मिन् ग्रन्थे शैवाभिमतानि तत्त्वानि, सृष्ट्युत्पत्तिः, चितेः स्वरूपम्, प्रमातॄणां स्वरूपम् इत्यादयः विषयाः निरूपिताः सन्ति। अस्य अध्ययनेन छात्राः प्रत्यभिज्ञासम्प्रदायस्य प्रमुखसिद्धान्तान् अवगन्तुं पारयन्ति।

CO–SKT–HC–205 – 2 ब्रह्मसंहिता (पंचमोऽध्यायः)

पांचरात्र–वैष्णव–सम्प्रदायस्य ग्रन्थः ब्रह्मसंहिता वैष्णवतन्त्रागमः अस्ति। अस्यि विषये मन्यते यत् एषा संहिता ब्रह्मणः मुखादेव निःसृता। अस्याः केवलं पंचमोऽध्यायः प्राप्तः। अस्मिन्नध्याये सृष्ट्युत्पत्तेः वर्णनं, आदिपुरुषगोविन्दस्य भजनं च विद्यते। अद्यत्वे संहितैषा इस्कॉन इति सम्प्रदायस्य स्तुतिग्रन्थः वर्तते। अस्याः अध्ययनेन छात्राः वैष्णवतन्त्रस्य परिचयं प्राप्नुवन्ति।

CO–SKT–HC–205 – 3 – सौन्दर्यलहरी (1–50)

आदिशंकराचार्यविरचितायां सौन्दर्यलहर्या देवीपार्वत्याः त्रिपुरासुन्दरीनाम्ना स्तुतिः, नखशिखसौन्दर्यवर्णनं च उपलब्धमस्ति। एषा तु अलंकारविभूषिता साहित्यिकरचना अस्ति, यत्र आनन्दलहरी नाम–प्रथमभागे देव्याः सौन्दर्यवर्णनं विद्यते। देवीपार्वती एव शिवस्य शक्तिः, पुरुषस्य प्रकृतिर्वा। अतः एषः शैवतन्त्रस्य शाक्तसम्प्रदायस्य प्रसिद्धः ग्रन्थः अस्ति।

CO–SKT–HC–205 – 4 सौन्दर्यलहरी (51–103)

सौन्दर्यलहर्याः अध्ययनेन छात्राः शाक्ततंत्रस्य परिचयं प्राप्नुवन्ति। संस्कृतमाध्यमेन श्लोकव्याख्या भाषाज्ञानं विवर्धयति।

## COURSE CODE : SKT-HC-301
## एकादशं पत्रम् : पालिभाषा साहित्यं च
### Paper- XI : Palibhasa Sahityam Cha

Co-301-I : पालिसंग्रहे संकलितजातकैः सुन्दरीसुत्त–मज्झिम पटिपदा–प्रतीत्य– समुत्पादादिपाठानां माध्यमेन छात्राः बौद्धधर्मस्य मूलसिद्धान्तैः परिचिताः भविष्यन्ति ।

Co-301-II :पालिसंग्रहे संकलितानां चरियापिटक–थेरगाथा– पब्बासुत–धम्मपदादिपद्यबद्धरचनानां माध्यमेन भिक्षुभिक्षुणीनां जीवनेन वयं नैतिकशिक्षां प्राप्नुमः ।

Co-301-III :पालिसाहित्यस्य ऐतिहयमाध्यमेन छात्रान् बौद्धग्रन्थैः सह मध्यकालीनानां सम्प्रदायानां धार्मिकसिद्धान्तां ज्ञानं बौद्धकालीनसमाजस्य च ज्ञानं कार्यते ।

Co-301-IV : कस्यापि भाषायाः अवगमनार्थं व्याकरणस्यावश्यकता भवति । अस्मिन् घटके छात्रान् पालिव्याकरणस्य अध्ययनं कारयिष्यते ।

## COURSE CODE : SKT- SC-302-A
## द्वादशं पत्रम् : ऋक्संहिता यजुस्संहिता च
### Paper-XII : Riksamhita Yajussamhita Cha

Co-302-A-I : एतस्मिन् घटके संकलितकतिपय ऋग्वेदीयसूक्तानां माध्यमेन वयं देवतानां स्वरूपं ज्ञास्यामः ।

Co-302-A-II : ऋग्वेदीय–पूषन्–वास्तोष्पति–सरस्वती–अक्षादिसूक्तानां माध्यमेन वयं इहलौकिकपारलौकिकज्ञानं प्राप्स्यामः ।

Co-302-A-IIII : यजुर्वेदस्य एकत्रिंशत्तमेऽध्याये यज्ञपुरुषस्य माध्यमेन विराटपुरुषस्य समाजपुरुषस्य व्यक्तिरुपपुरुषस्य च ज्ञानं प्राप्यते । अस्मिन् कथितं यत् शरीरस्य यदि सर्वेऽवयवाः सम्यक्तया कार्यं कुर्वन्ति चेत् मानवः उन्नतिं प्राप्नोति । तथैव समाजस्य सर्वे वर्गाः मिलित्वा स्वकर्त्तव्यं पालयेयुश्चेत् समाजराष्ट्रौ उन्नतिं कुर्वतः ।द्वात्रिंशत्तमेऽध्याये अनेकनामभिः बहुदेववादस्य वर्णनं विद्यते ।

Co-302-A-IV : यजुर्वेदस्य त्रयस्त्रिंशत्तमेऽध्याये अग्नि–इन्द्र–सूर्यादिदेवानां स्वरूपस्याध्यापनं विशदतया कार्यते ।

## COURSE CODE : SKT- SC-303-A
## त्रयोदशं पत्रम् : ब्राह्मणसाहित्यम्
**Paper- XIII : Brahmanasahityam**

Co-303-A-I : महिदास – ऐतरेयविरचितं ऐतरेयब्राह्मणस्य चतुस्त्रिंशत्तमाद् अध्यायाद् यज्ञस्य चतुर्वर्णानाञ्चोत्पत्तिं, यज्ञस्य पात्रैः – स्फय–कपाल–अग्निहोत्र– हवणी–सूप–कृष्णाजिनादिभिः सह अनुष्ठानस्य विधेः ज्ञानं प्राप्यते ।

Co-303-A-II : ऐतरेयब्राह्मणस्य पञ्चत्रिंशत्तमाद् अध्यायाद् छात्राः राजाविश्वंतरमृगवपुत्ररामयोः सम्वादेन राजसूययज्ञे क्षत्रियेण सोमपानं कर्त्तव्यं न वा इति सविस्तरेण ज्ञास्यन्ते । एतेन सार्धं न्यग्रोध–उदुम्बरअश्वत्थादीनां भक्षणस्य लाभाः उल्लिखिताः सन्ति ।

Co-303-A-III : एतस्मिन् घटके चरकसौत्रामणीयज्ञस्य स्वरूपं प्राप्यते । अश्विनीकुमाराभ्यां सोमविहीनेन्द्रस्य रक्षणकारणाद् एतस्य नाम सौत्रामणी सञ्जातः ।

Co-303-A-IV : शतपथब्राह्मणे वर्णितानेकाख्यानेषु मनुमत्स्याख्यानमप्येकं विद्यते । एतस्मिन् मनोः कथा अत्यन्ता मार्मिकी सरसा च वर्तते । मत्स्यावतारस्य बीजाः अस्यामेव कथायां सन्ति यत् केनप्रकारेण आप्लवाद् मनुना मत्स्यस्य सहाय्येन मानवीसृष्टिः रक्षिता । मानवानां नाशे सति संचितबीजेभ्यः यज्ञमाध्यमेन मानवस्य पुनः प्रादुर्भावः अस्मिन् भूतले अभवत् ।

## COURSE CODE : SKT- SC-304-A

## चतुर्दशं पत्रम् : कल्पसाहित्यम्

**Paper- XIV : Kalpasahityam**

Skt-sc-304-A-I : कात्यायनश्रौतसूत्रं शुक्लयजुर्वेदस्य माध्यन्दिनशाखायाः महत्त्वपूर्णो ग्रन्थो वर्तते । श्रौतसूत्रेषु अग्नौ सम्पाद्यमानानां यज्ञयागाद्नुष्ठानानां वर्णनं विद्यते । एतस्माद् घटकाद् छात्राः दर्शपौर्णमासस्य नियमव्रतान्, वेदिपरिग्रहं, समिद्होमपात्रस्थापनं, हविषां संस्कारः, पुरोडाशार्थं तण्डुलानां पेषणम् इत्यादीभिः एतेषां अलौकिकफलस्य ज्ञानं लप्स्यन्ते ।

Skt-sc-304-A-II : पुरोडाशानां पाकविधिः, वेदिनिर्माणं, पत्नीसन्नहनं, प्रस्तरास्तरणम् इत्येतेषां विधीनां सूक्ष्मतया अध्ययनं कार्यते ।

Skt-sc-304-A-III : पारस्करगृहयसूत्रं शुक्लयजुर्वेदस्य महत्त्वपूर्णं गृहयसूत्रं विद्यते । एतस्य प्रथमकाण्डेन वयं आवस्थ्याग्नेः आधानविधिं, विवाहगर्भाधानपुंसवनादिसंस्काराणां ज्ञानं प्राप्स्यामः ।

Skt-sc-304-A-IV : शुल्बसूत्रेभ्यः वेदिनिर्माणं, विविधवेदीनां मानप्रक्रिया, मण्डपानां निर्माणविधिः इत्येतैः सार्धं छात्राः आधुनिकज्यामितेः वास्तुशास्त्रस्य च ज्ञानं प्राप्स्यन्ति ।

## COURSE CODE : SKT- SC-305-A

## पञ्चदशं पत्रम् : ऋक्प्रातिशाख्यं छन्दांसि च

**Paper- XV : Rikpratishakhyam Chhandansi Cha**

Skt-sc-305A-I : आचार्यशौनकेन विरचितम् ऋक्प्रातिशाख्यं प्राचीनतया प्रामाणिकतया च महत्त्वपूर्णं स्थानं भजते । कस्यापि ग्रन्थस्य अवबोधाय पारिभाषिकशब्दानां ज्ञानमत्यन्तावश्यकं भवति । अस्मिन् घटके छात्रेभ्यः अनेकविधपारिभाषिकशब्दानां – स्वर–व्यंजन–स्वरभक्ति–रक्त–नामि इत्यादीनां बोधः कारयिष्यते ।

Skt-sc-305A-II : ऋक्प्रातिशाख्यस्य द्वितीये पटले प्रश्लिष्ट–क्षैप्र–उद्ग्राहादि– स्वरसन्धीनां तृतीये पटले च उदात्त–अनुदात्त–स्वरित–कम्पादिस्वराणां परिचयः कार्यते ।

Skt-sc-305 A -III : अस्मिन् घटके वयं व्यंजनसन्धिविसर्जनीयसन्धीनां ज्ञानं प्राप्स्यामः ।

Skt-sc-305A-IV : वेदमन्त्राणामुच्चारणार्थं छन्दानां ज्ञानं महदावश्यकं भवति। छन्दज्ञानेन विना मन्त्राणामुच्चारणं पाठश्च सम्यक्तया न सम्भवति । एतस्मादेव अस्मिन् घटके छन्दानां सूक्ष्मदृष्ट्या अध्ययनं कारयिष्यते ।

## COURSE CODE : SKT- SC-302-B

## द्वादशं पत्रम् : व्याकरणपरम्परा (1)

### Paper- XII : Vyakaranaparampara (1)

Co. 302 B-I : घटकेऽस्मिन् प्रमुखाष्टवैयाकरणानां शाकटायन–आपिशलि–काशकृत्स्न–व्याडि–पाणिनि–कात्यायन–पतञ्जलिः इत्येतेषां परिचयः छात्रान् कार्यते।

Co. 302 B-II : अस्मिन् खण्डे काशिकाकारयोः वामनजयादित्ययोः, न्यासकारस्य जिनेन्द्रबुद्धिनः, पदमञ्जरीकारस्य हरदत्तस्य, प्रक्रियाकौमुदीकारस्य रामचन्द्रस्य, सिद्धान्तकौमुदीकारयोः भट्टोजिदीक्षितवरदराजयोः परिचयः प्रदीयते ।

Co. 302 B-III : कस्यापि ग्रन्थस्यावबोधाय तस्य पारिभाषिकशब्दानां ज्ञानमपेक्षते । अस्मादेवस्मिन् घटके अष्टाध्याय्याः प्रथमाध्यायस्य प्रथमपादस्य कतिपयप्रमुखाभिः संज्ञाभिः वृद्धिगुणसंयोगसवर्णप्रगृहयघुघादीभिः छात्राः परिचिताः भवन्ति ।

Co. 302 B-IV : अस्मिन् भागे वैयाकरणसिद्धान्तकौमुद्या : अनुसारं उणादिप्रकरणस्य प्रथमः पादः पाठ्यते ।

## COURSE CODE : SKT- SC-303-B

## त्रयोदशं पत्रम् : व्याकरणदर्शनम् (1)

### Paper-XIII : Vyakaranadarshanam (1)

Co. 303 B-I : घटकेऽस्मिन् पतञ्जलिमुनिविरचितमहाभाष्यस्य प्रथमाह्निकं पस्पशाहिनकमध्याप्यते ।

Co. 303 B-II : भर्तृहरिणा प्रणीतस्य वाक्यपदीयस्य ब्रह्मकाण्डस्य दार्शनिकसिद्धान्तैः छात्राः परिचिताः भवन्ति ।

Co. 303 B-III : नागेशभट्टस्य वैयाकरणसिद्धान्तपरमलघुमञ्जूषायाः अनुसारं शक्तिनिरूपणं लक्षणानिरूपणञ्च छात्रान् कार्यते ।

Co. 303 B-IV : अस्मिन् खण्डे छात्रान् वैयाकरणसिद्धान्तपरमलघुमञ्जूषायाः धात्वर्थनिर्णयो नाम विषयोऽध्याप्यते ।

**COURSE CODE : SKT- SC-304-B**

## चतुर्दशं पत्रम् : व्याकरणप्रक्रिया (1)

**Paper-XIV : Vyakaranaprakriya (1)**

Co. 304, B-I : अस्मिन् घटके भट्टोजिदीक्षितविरचितस्य वैयाकरणसिद्धान्त- कौमुद्याः पूर्वार्द्धस्य अजन्तपुल्लिङ्गप्रकरणादारभ्य अजन्तनपुंसकलिङ्गप्रकरणस्य सूत्रोल्लेखपूर्वकं रूपसिद्धिप्रक्रिया अध्याप्यते ।

Co. 304, B- : II अस्मिन् भागे छात्राः वैयाकरणसिद्धान्तकौमुद्याः पूर्वार्द्धधस्य स्त्रीप्रत्ययप्रकरणं सोदाहरणं सूत्रव्याख्या पूर्वकं पठिष्यन्ति ।

Co. 304, B-III : अस्मिन् खण्डे वैयाकरणसिद्धान्तकौमुद्यानुसारं अव्ययीभावसमासप्रकरणं तत्पुरुषसमासप्रकरणञ्च रूपसिद्धिप्रक्रियापूर्वकं सम्यक् अवगमिष्यन्ति ।

Co. 304, B-IV : अस्मिन् घटके वैयाकरणसिद्धान्तकौमुद्यानुसारं तद्धितेष्वपत्याधिकरणस्य समर्थानां प्रथमाद् वा इति सूत्रादारभ्य क्षुद्राभ्यो वा इति यावत् अण्-अञ्-नञ्स्नञौ-इञ्-अकङ-ञ्य-फक्-यञ्-फञ्-ढक्-ऐरक्- ढ्रक् इत्येतैः प्रत्ययैः छात्राः परिचिताः भवन्ति ।

**COURSE CODE : SKT- SC-305-B**

## पञ्चदशं पत्रम् : व्याकरणप्रक्रिया (2)

**Paper- XV : Vyakaranaprakriya (2)**

Co. 305, B-I : घटकेऽस्मिन् वैयाकरणसिद्धान्तकौमुद्याः उत्तरार्द्धस्थ भ्वादिगणस्य भू-एध-व्रज-कमु-जि-वृतु इत्येतेषां धातूनां सूत्रवार्तिकपूर्वकं रूपसिद्धिप्रक्रिया बालान् बोध्यते ।

Co. 305, B-II : अत्रापि वैयाकरणसिद्धान्तकौमुद्याः उत्तरार्द्धस्य भ्वादिगणस्य ह्वञ्-णीञ्-गै-पा-घ्रा-ष्ठा-दाण्-डुलभष्-गम्लृ-दृशिर्-डुपचष्-यज-वस-वद एतेषां धातूनां रूपसिद्धिप्रक्रियायाः बोधो छात्रान् भवति ।

Co. 305, B-III : वैयाकरणसिद्धान्तकौमुद्या : उत्तरार्द्धस्थ अदादिप्रकरणस्य दुह्-आस्-शीङ्-इण् धातूनां, जुहोत्यादिप्रकरणस्य ओहाक्-डुधाञ् धातूनाञ्च ससूत्रवार्तिकोल्लेखपूर्वकं रूपसिद्धिप्रक्रियां छात्राः अवगमिष्यन्ति ।

Co. 305, B-IV : अस्मिन् भागे छात्राः वैयाकरणसिद्धान्तकौमुद्यनुसारं णिच्प्रकरणं सन्प्रकरणमनु णिजन्त-सनन्तशब्दानां सिद्धिं साधयिष्यन्ति।

## COURSE CODE : SKT- SC-302-C
## द्वादशं पत्रम् : न्यायदर्शनम्
### Paper- XII : Nyayadarshanam

SKT-SC-302-C-1 सिद्धांतमुक्तावल्याः प्रत्यक्षखण्डस्य अध्ययनेन न्यायदर्शनानुसारं प्रत्यक्षप्रमाणस्य तत्त्वमीमांसायाः च ज्ञानम् भवति ।

SKT-SC-302-C-2 सिद्धांतमुक्तावल्याः कारिकानां सप्रसंगव्याख्यापद्धतेः ज्ञानम् वर्धते ।

SKT-SC-302-C-3 सिद्धांतमुक्तावल्याः पङ्क्तीनां व्याख्यानाः निमित्तं मूलपाठस्य सूक्ष्मम् अध्ययनम् क्रियते।

SKT-SC-302-C-4 न्यायदर्शनस्य प्रमुखसिद्धांतानां टिप्पणीलेखनद्वारा छात्राणाम् वस्तुनिष्ठं ज्ञानम् परीक्ष्यते।

## COURSE CODE : SKT- SC-303-C
## त्रयोदशं पत्रम् : पूर्वमीमांसादर्शनम्
### Paper- XIII : Purvamimamsadarshanam

SKT-SC-303-C-1 मानमेयोदयग्रन्थस्य अध्ययनेन मीमांसादर्शनस्य प्रमुखसिद्धांतानां पदार्थानां च ज्ञानम् भवति ।

SKT-SC-303-C-2 मानमेयोदयग्रन्थस्य कारिकानां महत्त्वं अवगम्यते व्याख्यापद्धतेः च ज्ञानम् जायते ।

SKT-SC-303-C-3 मानमेयोदयग्रन्थस्य पङ्क्तीनां व्याख्यायाः निमित्तं मूलपाठस्य सूक्ष्मम् अध्ययनम् क्रियते।

SKT-SC-303-C-4 पूर्वमीमांसादर्शनस्य प्रमुखसिद्धांतानां टिप्पणीलेखनद्वारा वस्तुनिष्ठं ज्ञानम् भवति ।

## COURSE CODE : SKT- SC-304-C

## चतुर्दशं पत्रम् : चार्वाकदर्शनम् जैनदर्शनम् च

**Paper- XIV : Charvakadarshanam Jainadarshanam Cha**

SKT-SC-304-C-1 सर्वदर्शनसंग्रहग्रन्थस्य प्रथमस्य तृतीयस्य च अध्यायद्वयस्य अध्ययनद्वारा चार्वाकजैनदर्शनयोः प्रमुखसिद्धान्तानां ज्ञानम् प्राप्यते ।

SKT-SC-304-C-2 कारिकानां सप्रसङ्गव्याख्याकरणेन लेखनकौशलस्य विकासः भवति ।

SKT-SC-304-C-3 गद्यपङ्क्तीनां व्याख्या विषयस्य सूक्ष्मम् अध्ययनं प्रेरयति।

SKT-SC-304-C-4 चार्वाक–जैन–दर्शन–द्वयम् अधिकृत्य टिप्पणीलेखनद्वारा वस्तुनिष्ठं ज्ञानम् अभिवर्धते ।

## COURSE CODE : SKT- SC-305-C

## पञ्चदशं पत्रम् : बौद्धदर्शनम्

**Paper- XV : Bauddhadarshanam**

SKT-SC-305-C-1 सर्वदर्शनसंग्रहग्रन्थस्य द्वितीये अध्याये बौद्धदर्शनस्य प्रतिपादनम् वर्तते । तमवलम्ब्य बौद्धदर्शनस्य प्रमुखसिद्धान्तानां ज्ञानम् प्राप्यते।

SKT-SC-305-C-2 कारिकानां सप्रसङ्गव्याख्याकरणेन लेखनकौशलस्य विकासः भवति ।

SKT-SC-305-C-3 गद्यपङ्क्तीनां व्याख्या विषयस्य सूक्ष्म–अध्ययनार्थं प्रेरयति।

SKT-SC-305-C-4 बौद्धदर्शनम् अधिकृत्य टिप्पणीलेखनद्वारा वस्तुनिष्ठं ज्ञानम् अभिवर्धते ।

## COURSE CODE : SKT- SC-302-D

## द्वादशं पत्रम् : नाट्यसाहित्यम्

**Paper- XII : Natyasahityam**

Co. 302. D I : कविपरिचयेन साहित्यं समृद्धं भवति । ग्रन्थाध्ययेन अवस्थानुकृति–र्नाट्यत्वात्प्रकरणस्य वैशिष्ट्यं ज्ञायते ।

Co. 302. D II : प्रकरणकथानकं तत्सम्बद्धधाश्च प्रश्नाः ग्रन्थस्य वैशिष्ट्यं प्रमाणीकुर्वन्ति ।

Co. 302. D III : काव्यनाट्यवैशिष्ट्यसहितं व्युत्पत्तिपरं ज्ञानमुपलभ्यते ।

Co. 302. D IV : अत्र ग्रन्थस्य ऐतिहासिकप्रमाणपुरस्सरं पात्रविशेषाणां वैशिष्ट्यं परिचीयते ।

## COURSE CODE : SKT- SC-303-D
## त्रयोदशं पत्रम् : काव्यशास्त्रम् (1)
### Paper- XIII : Kavyashastram (1)

Co. 303. D I : एतेन संस्कृतमाध्यमेन काव्यशास्त्रीयाणामाचार्याणां व्याख्यापुरस्सरं कव्यलक्षणभेदप्रयोजनाभिधाशक्त्यात्मकः परिचयोऽपि सम्यगवाप्यते ।

Co. 303. D II : अत्र शब्दार्थयोः स्वरूपं, अर्थात् लक्षणां तद्भेदांश्च विद्यार्थिनः स्पष्टतया अवगच्छन्ति । प्रश्नान् अपि साधयन्ति तत्सम्बद्धान् ।

Co. 303. D III : घटकेऽस्मिन् छात्राः सारल्येन शाब्दीव्यञ्जनां च सोद्धरणमवगच्छन्ति । छात्राः आलोचनात्मकान् प्रश्नान् विस्तारयन्ति विषयमधिगच्छन्ति च ।

Co. 303. D IV : अस्मिन् घटके रससूत्रस्य व्याख्यापूर्वकं चतुर्णां रससिद्धान्तानां ज्ञानं भवति । भेदसहिताः नवरसाः, भावध्वनयः, रसाभासाः, भावाभासाश्च ज्ञानगोचराः भवन्ति छात्रेभ्यः ।

## COURSE CODE : SKT- SC-304-D
## चतुर्दशं पत्रम् : काव्यं काव्यशास्त्रस्य च इतिहासः
### Paper- XIV : Kavyam Kavyashastrasya Cha Itihasah

Co. 304. D I : अस्मिन् घटके छात्राः ग्रन्थस्य परिचयपुरस्सरं व्युत्पत्तिपरां साहित्यिकीं व्याख्यामधिगच्छन्ति ।

Co. 304. D II : अत्र ग्रन्थस्य संस्कृतमाध्यमेन निर्धारितानां श्लोकानां व्युत्पत्तिपरां व्याख्यां सम्यगवधारयन्ति ।

Co. 304. D III : अस्मिन् घटके छात्राः कवेः, तत्सम्बद्धधञ्च ग्रन्थमवगत्य काव्यसौष्ठनिर्देशपूर्वकं व्युत्पत्तियुतां व्याख्यामधिगच्छन्ति ।

Co. 304. D IV : अस्मिन् घटके निर्धारिताः काव्यशास्त्रिणः छात्रैः पठ्यन्ते । तेषां काव्यशास्त्रे योगदानं जानन्ति ।

**COURSE CODE : SKT- SC-305-D**

**पञ्चदशं पत्रम् : ऐतिहासिककाव्यं खण्डकाव्यं च**

**Paper- XV : Aitihasikakavyam Khandakavyam Cha**

Co. 305. D I : अस्मिन् घटके निर्धारितानां श्लोकानां व्युत्पत्तिपरां व्याख्यां छात्राः ग्रन्थपरिचयपूर्वकमधिगच्छन्ति ।

Co. 305. D II : अस्मिन् घटके निर्धारितैः श्लोकैः व्युत्पत्तिपरया व्याख्ययाच विद्यार्थिनः संवर्द्धिताः जायन्ते ।

Co. 305. D III : अस्मिन् घटके कवेः परिचयपूर्वकं निर्धारितानां श्लोकानां व्युत्पत्तिपरां व्याख्यां छात्राः समधिगच्छन्ति ।

Co. 305. D IV : अस्मिन् घटके छात्राः खण्डकाव्येन परिचिताः भूत्वा ग्रन्थस्य निर्धारितानां श्लोकानां व्युत्पत्तिपरां संस्कृतव्याख्यां सम्यगवधारयन्ति ।

**COURSE CODE : SKT- SC-302-E**

**द्वादशं पत्रम् : धर्मशास्त्रम्**

**Paper-XII : Dharmaśāstram**

SKT-SC-302-E-1 याज्ञवल्क्यस्मृतिः भारतीयधर्मशास्त्रस्य अन्यतमः ग्रन्थः अस्ति । अस्य ग्रन्थस्य प्रथमे अध्याये ब्रह्मचारिप्रकरणे आचारनियमाः प्रतिपादिताः । अस्य अध्ययनेन हिन्दूधर्मस्य ज्ञानं लभ्यते ।

SKT-SC-302-E-2 याज्ञवल्क्यस्मृतेः प्रथमे अध्याये राजधर्मप्रकरणस्य अध्ययनेन राजधर्मस्य परिचयः प्राप्यते ।

SKT-SC-302-E-3 कौटिलीय–अर्थशास्त्रस्य अध्ययनेन आन्वीक्षिकी–त्रयी–वार्ता दण्डनीतिविद्यानां इन्द्रियजयेत्यादिविषयाणाम् ज्ञानम् प्राप्यते ।

SKT-SC-302-E-4 कौटिल्यस्य तन्त्रयुक्तयः व्यावहारिकं ज्ञानं विभिन्नविषयाणाम् लक्षणानि च प्रददति ।

## COURSE CODE : SKT- SC-303-E
## त्रयोदशं पत्रम् : नैगमिकागमः
### Paper-XIII : Naigamikāgamaḥ

SKT-SC-303-E- ऋग्वेदस्य श्रीसूक्तः देवीलक्ष्म्याः स्तुतिपरकः सूक्तः अस्ति, यस्य अध्ययनं स्तुतिपरंपरायाः ज्ञानम् ददाति ।

SKT-SC-303-E-2 भावनोपनिषद् अथर्ववेदस्य शाक्तसंप्रदायस्य उपनिषद् अस्ति यस्यां श्रीचक्रयन्त्रस्य ज्ञानम् प्रस्तुतम् ।

SKT-SC-303-E-3 माण्डूक्यकारिका आचार्यगौडपादस्य कृतिः अस्ति यस्याम् अद्वैतवेदान्तदर्शनस्य प्रतिपादनम् अस्ति ।

SKT-SC-303-E-4 माण्डूक्यकारिका आचार्यगौडपादस्य कृतिः अस्ति यस्याम् अद्वैतवेदान्तदर्शनस्य प्रतिपादनम् अस्ति ।

SKT-SC-303-E-4 माण्डूक्यकारिकायाः कारिकाव्याख्या अद्वैतसिद्धान्तस्य गहनाध्यनं प्रापयति ।

## COURSE CODE : SKT- SC-304-E
## चतुर्दशं पत्रम् : भगवद्गीतागमिकभाष्यम् (1)
### Paper-XIV : Bhagavadgītāgamikabhāṣyam (1)

SKT-SC-304-E-1 श्रीमद्भगवद्गीतायाः राजानकानन्दकविकृतानन्दवर्धिनी– टीकालोके अध्ययनं गीतायां प्रतिपादितदर्शनस्य ज्ञानम् ददाति । प्रथमद्वितीयाध्यायद्वये विषादयोगः सांख्ययोगः च विषयद्वयम् प्रतिपादितम् ।

SKT-SC-304-E-2 गीतायाः तृतीय–चतुर्थ अध्याययोः प्रतिपादितं कर्मयोगस्य ज्ञानकर्मसंन्यासयोगस्य च

SKT-SC-304-E-3 गीतायाः पञ्चषडध्यायद्वयमधिकृत्य विशदाध्ययनेन कर्मसन्याससयोगस्य आत्मसंयमयोगस्य च ज्ञानं प्राप्यते ।

SKT-SC-304-E-4 गीतायाः सप्तमस्य अष्टमस्य च अध्यायद्वयस्य अध्ययनेन तत्र प्रतिपादितं ज्ञानविज्ञान–अक्षरब्रह्म–योगद्वयस्य ज्ञानं प्राप्यते ।

## COURSE CODE : SKT- SC-305-E

## पञ्चदशं पत्रम् : भगवद्गीतागमिकभाष्यम् (2)

### Paper-XV : Bhagavadgītāgamikabhāṣyam (2)

SKT-SC-305-E-1 गीतायाः नव–दश–एकादशाध्यायानाम् आगमिकभाष्यलोके अध्ययनेन आगमिकदृष्ट्या राजगुह्यराजविधायोगः, विभूतियोगः विराट्योगः च अवगम्यन्ते ।

SKT-SC-305-E-2 गीतायाः द्वादशाध्यायतः चतुर्दशाध्यायपर्यन्तं श्लोकानाभध्ययनेन भक्तः माहात्म्यं क्षेत्रक्षेत्रज्ञविभाग, गुणत्रयविभागः, च विषयाः अवगम्यन्ते ।

SKT-SC-305-E-3 गीतायाः पञ्चदश–षोडश–अध्यायेषु प्रतिपादितस्य विषयस्य पुरुषोत्तमयोग–देवासुरसंपद्विभागयोगयोः ज्ञानम् प्राप्यते ।

SKT-SC-305-E-4 गीतायाः सप्तदश–अष्टादश–अध्यायानां । अध्ययनं श्रद्धात्रयविभागस्य मोक्षसंन्यासयोगस्य च ज्ञानं ददाति ।

## COURSE CODE : SKT-HC-401

## षोडशं पत्रम् : प्राकृतभाषा साहित्यं च

### Paper- XVI : Prakritabhasa Sahityam Cha

Co-401-I : प्राकृतप्रवेशिकायां संकलितपाठानां माध्यमेन प्राकृतलेखकानां जीवनपरिचयः, तेषां कृतिभिः सह अस्मान् जैनधर्मस्य सिद्धान्तानां ज्ञानमपि प्राप्यते ।

Co-401-II : प्राकृतप्रवेशिकायां संकलितपाठानां माध्यमेन तत्कालीनसमाजव्यवस्था राजनैतिकव्यवस्थाधार्मिकव्यवस्थायाः परिचयः प्राप्यते ।

Co-401-III : प्राकृतसाहित्यस्यैतिहासेन प्राकृतभाषायाः उत्पत्तिविकासयोश्च, जैनधर्मस्य आगमषट्खण्डागम- प्रवचनसारादिग्रन्थानां ज्ञानं प्राप्यते सार्धमेव श्रमण-श्रमणिका- उपासकादिनां नियमानां बोधो भवति ।

Co-401-IV : प्राकृतभाषायाः अवबोधार्थं अस्मिन् घटके प्राकृतव्याकरणस्य ज्ञानं कार्यते ।

**COURSE CODE : SKT- SC-402-A**

## सप्तदशं पत्रम् : अथर्वसंहिता सामसंहिता च

**Paper- XVII : Atharvasamhita Samasamhita Cha**

Co-402A-I : अथर्ववेदीयसूक्तैः राष्ट्रस्योन्नतिं, कृमीनां नाशः, दीर्घायोः प्राप्तिः कथं भवेत् एतेषां विषयाणां ज्ञानं अस्माभिः प्राप्यते ।

Co-402A-II : अस्मिन् घटके ऋषिः भूमिसूक्तस्य माध्यमेन भूमेः प्रतिः अत्यन्तां श्रद्धां परिचयन् कथयति यत् माताभूमिः पुत्रोऽहं पृथिव्याः । एतस्य अध्ययनात् प्रकृतेः स्वार्थवशदोहनं विहाय पर्यावरणसंरक्षणस्य प्रेरणा लभते ।

Co-402A-III : सामवेदीयपवमानकाण्डस्य मंत्रैः छात्रान् सोमदेवतः सोमरसस्वरूपस्य च ज्ञानं कार्यते सार्धमेव योगीनां कृते ज्ञानरूपीसोमरसस्य बोधोऽपि प्राप्यते ।

Co-402A-IV : सायणकृत-ऋग्वेदीयभाष्यभूमिकायाः माध्यमेन वेदस्य सत्ता, मंत्राणां सार्थक्यानर्थक्यं, वेदपौरुषेय-अपौरुषेयादिविषयाणां ज्ञानं प्राप्यते । आचार्यशौनकविरचितं बृहद्देवतया देवतानां ज्ञानं, देवतानां संख्यादीनां ज्ञानं प्राप्यते ।

**COURSE CODE : SKT- SC-403-A**

## अष्टादशं पत्रम् : आरण्यकोपनिषत्साहित्यम्

**Paper- XVIII : Aranyakopanisatsahityam**

Co-403A-I : अरण्ये पठनात् ऐते आरण्यकाः कथ्यन्ते । तैत्तिरीयारण्यकस्य द्वितीयप्रपाठकस्य प्रथमदशानुवाकानां माध्यमेन छात्राः यज्ञोपवीतस्य सव्य- प्राचीनवीती भेदान्, संध्योपासनायाः विधिं, प्रायश्चितस्वरूपं, कुष्माण्डहोम, स्वाध्यायं, पंचमहायज्ञानां च ज्ञानं प्राप्स्यन्ते ।

Co-403A-II : एतस्मिन् घटके अयाजनीयेन यज्ञकारणे दक्षिणायाः आदान- प्रदानेसति प्रायश्चित्तं, स्वाध्यायः, ध्रुवध्यानं, दिग्-उपस्थानादिविशयाणां माध्यमेन कर्मकाण्डस्य गूढता अवबोध्यते ।

Co-403A-III : वेदस्यान्तिमभागकारणाद् सारभूतसिद्धान्तानां प्रतिपादकत्वात् उपनिषदेव वेदान्तनाम्ना विख्यातमस्ति । तैत्तिरीयोपनिषदा वयं शिक्षायाः स्वरूपं, दीक्षान्ते विद्यार्थिनं प्रदीयमानं उपदेशं, पंचविधा संहितोपासना, वारुणीविद्या इत्यादीनां ज्ञानं प्राप्नुमः ।

Co-403A-IV : मुण्डकोपनिषदा छात्राः विद्यायाः परा–अपरा स्वरूपं, अग्नेः सप्तजिहवाः अक्षरअविनाशीब्रह्मणः स्वरूपं मोक्षप्राप्तेः साधनानां ज्ञानं प्राप्स्यन्ते।

## COURSE CODE : SKT- SC-404-A
## एकोनविंशं पत्रम् : वेदव्याख्यापद्धतयः वेदभाष्यकाराश्च
### Paper- XIX : Vedavyakhyapaddhatayah Vedabhasyakarashcha

Co. 404-A- I : एतस्मिन् घटके पारम्परिकभाष्यं, पदपाठस्य नियमाः, अनुक्रमणी साहित्यस्य परिचयः बृहद्देवतादिग्रन्थानां ज्ञानं लभते ।

Co. 404-A-II : एतस्माद् घटकाद् वयं कल्पसूत्रं, निरुक्तं, स्कन्दमहेश्वरभाष्यं माधवसायणयोः कृतीनां परिचयं प्राप्स्यामः ।

Co. 404-A - III अस्मिन् घटके वेदानां भाष्यकर्तृणां पाश्चात्यविदुषां जीवनपरिचयं तेषां वेदभाष्यपद्धतेः ज्ञानं प्राप्यते ।

Co. 404-A-IV : एतस्मिन् घटके वेदेषु भाष्यकर्तृणां भारतीयविदुषां जीवनपरिचयं तैः लिखितभाष्यग्रन्थानां बोधो भवति ।

## COURSE CODE : SKT- SC-405-A
## विंशं पत्रम् : वैदिकव्याकरणम्
### Paper- XX : Vaidikavyakaranam

Co-405A-I : अस्मिन् घटके वैदिकप्रक्रियायाः माध्यमेन संहितासु प्रयुक्तशब्दानां सिद्धेर्ज्ञानं प्राप्यते ।

Co-405A-II : एतस्मिन् घटके छात्राः धातूनां विभिन्नरूपैः सार्धं तेषां विविध–अर्थानां तुमर्थकादिप्रत्यानाञ्च ज्ञानं प्राप्स्यन्ति ।

Co-405A-III : वेदानामवगमनार्थं वेदाङ्गानामावश्यकता भवति, तेषु वेदाङ्गेषु शिक्षाग्रन्थानां स्वकीयवैशिष्टयं वर्तते । पाणिनीयाशिक्षायाः माध्यमेन वयं स्वराणामुच्चारणस्थानादीनां सूक्ष्मज्ञानं प्राप्स्यामः ।

Co-405A-IV : अस्मिन् घटके स्वामीदयानन्दविरचितसौवरस्य माध्यमेन वैदिकस्वर–उदात्त–अनुदात्त–स्वरित–प्रचय–कम्पादीनां ज्ञानं प्राप्यते ।

## COURSE CODE : SKT- SC-402-B
## सप्तदशं पत्रम् : व्याकरणपरम्परा (2)
### Paper- XVII : Vyakaranaparampara (2)

Co. 402- B-I : अस्मिन् घटके छात्राः भर्तृहरि–कैयट–कौण्डभट्ट–नागेशभट्टः इत्येतेषां व्यक्तित्वकृतित्वेन परिचिताः भवन्ति ।

Co. 402- B-I : छात्राः अष्टाध्यायी–महाभाष्य–काशिकावृत्ति–वाक्यपदीय–शब्दकौस्तुभवैयाकरणभूषणसार–वैयाकरणसिद्धान्तपरमलघुमञ्जूषा एत्येतेषां ग्रन्थानां विषयवस्तुना अवगताः भवन्ति ।

Co. 402- B-I : अस्मिन् खण्डे अष्टाध्याय्याः प्रथमोऽध्यायस्य प्रथमपादान्तर्गताः निष्ठा–सर्वनाम–सर्वनामस्थान– सम्प्रसारण–लोप–अि–उपधा–वृद्धम् इत्येते संज्ञाः छात्रान् अध्याप्यते ।

Co. 402-B-I : अस्मिन् भागे पाणिनीयशिक्षायां वर्णानामुत्पत्तिः वर्णानां विभागः, वर्णानामुच्चारणस्थानं वर्णानामुच्चारणस्य गुणदोषाः इत्येते विषयाः छात्रान् पाठ्यन्ते ।

## COURSE CODE : SKT- SC-403-B
## अष्टादशं पत्रम् : व्याकरणदर्शनम् (2)
### Paper- XVIII : Vyakaranadarshanam (2)

Co. 403-B-I : घटकेऽस्मिन् पतञ्जलिमुनिविरचितमहाभाष्यस्य द्वितीयाहि्नकं प्रत्याहाराहि्नकं पाठ्यते । अनेन छात्राः प्रत्याहारसूत्राणां वैज्ञानिकपक्षमवगमिष्यन्त।

Co. 403-B-II : भर्तृहरिहरिणा विरचितं वाक्यपदीयस्य ब्रह्मकाण्डस्य चतुः सप्ततिकारिकातः पञ्चपञ्चाशदधिकशतं कारिकापर्यन्तं अधीते । अनेन छात्राः स्फोटसिद्धान्तेन ध्वनिसिद्धान्तेन परिचिताः भवन्ति ।

Co. 403 -B-III : एतस्मिन् वैयाकरणसिद्धान्तपरमलघुमञ्जूषायाः व्यञ्जनानिरूपणं स्फोटनिरूपणञ्च विषयं अधीयते ।

Co. 403-B-IV : अस्मिन् घटके वैयाकरणसिद्धान्तपरमलघुमञ्जूषायाः कारकनिरूपणप्रकरणेन क्रियायाः निर्वर्तकं कारकं अयं बिन्दुः सार्थको भविष्यति।

**COURSE CODE : SKT- SC-404-B**

**एकोनविंशं पत्रम् : व्याकरणप्रक्रिया (3)**

**Paper- XIX : Vyakaranaprakriya (3)**

Co. 404-B-I : वैयाकरणसिद्धान्तकौमुद्याः हलन्तपुल्लिङ्गप्रकरणादारभ्य हलन्तनपुंसकलिङ्गप्रकरणं यावत् सोदाहरणं सूत्रोल्लेखपूर्वकं रूपसिद्धिप्रक्रियां छात्राः अवगमिष्यन्ति ।

Co. 404- B-II : घटकेऽस्मिन् : वैयाकरणसिद्धान्तकौमुद्याः पूर्वार्द्धस्य बहुव्रीहिसमासप्रकरणं द्वन्द्समासप्रकरणं सूत्रव्याख्यापूर्वकं रूपसिदधिप्रक्रिया प्रदर्श्यते ।

Co. 404-B-III : वैयाकरणसिद्धान्तकौमुद्याः तद्धितेष्वपत्याधिकारप्रकरणे पितृष्वसुश्छण् इति सूत्रादारभ्य दैवयज्ञि॰ इति सूत्रं यावत् छण्–ढञ्–यत्–ख–ढक्–अञ्–खञ्–छ–ठक्–ण–फिञ्–ण्य–इञ्–ष्यङ् इत्येते प्रत्ययाः छात्रान् पाठ्यन्ते ।

Co. 404-B-IV : अस्मिन् खण्डे छात्राः वैयाकरणसिद्धान्तकौमुद्यानुसारं तद्धितेषु मत्वर्थीयप्रकरणान्तर्गतं मतुप्–लज्–इलच्–श–न–ण–विनि–इनि–अण्–उरच् र–म–ईरन्–ईरच्–वलच्–इनि–ठन्–ठञ्–यप्–युस्–इत्यादीन् प्रत्ययान् ज्ञास्यन्ति।

**COURSE CODE : SKT- SC-405-B**

**विंशं पत्रम् : व्याकरणप्रक्रिया (4)**

**Paper- XX : Vyakaranaprakriya (4)**

Co. 405-B-I : वैयाकरणसिद्धान्तकौमुद्याः उत्तरार्द्धे तिङन्ते परिगणितां प्रमुखधातूनां सूत्रवार्तिकोल्लेखपूर्वकं रूपसिद्धिप्रक्रिया अध्याप्यते यथा– दिवादिप्रकरणे–जनी, णश, स्वादिप्रकरणे–

आप्लृ, तुद्दादिप्रकरणे–क्षिप्, इषु, विद्लृ, रुधादिप्रकरणे– भिदिर्, ञि इन्धी, तनादिप्रकरणे– षणु, मनु, क्रयादिप्रकरणे– लूञ्, ग्रह, चुरादिप्रकरणे– पीड, ज्ञप इत्यादीनाम्।

Co. 405- B-II : अस्मिन् घटके वैयाकरणसिद्धान्तकौमुद्यानुसारं यङ्प्रकरणं, आत्मनेपदप्रकरणं, परस्मैपदप्रकरणं सोदाहरणं सूत्रोल्लेखपूर्वकं छात्राःअवगमिष्यन्ति।

Co. 405-B-III : वैयाकरणसिद्धान्तकौमुद्याः उत्तरार्द्धे कृदन्तकृत्यप्रकरणे तव्य–तव्यत्–यत्–क्यप्–ण्यत्–अनीयर–केलिमर इत्येतैः प्रत्ययैः छात्राः परिचिताः भवन्ति।

Co. 405-B-IV : अस्मिन् घटके वैयाकरणसिद्धान्तकौमुद्यनुसारं उत्तरकृदन्त– प्रकरणे शतृ–शानच्–कत्वा–ल्युट्–तृच्–ण्वुल्–क्त–क्तवतु–ल्यप्–क्तिन् आदिप्रत्ययाः छात्रान् सम्यक् बोध्यन्ते ।

## COURSE CODE : SKT- SC-403-C
## अष्टादशं पत्रम् : अद्वैतवेदान्तदर्शनम्
### Paper- XVIII : Advaitavedantadarshanam

SKT-SC-403-C-1 ब्रह्मसूत्र–शांकरभाष्यम् अद्वैतवेदान्तदर्शनस्य आधारभूतग्रन्थः अस्ति, यस्य समन्वयाध्यासस्य चतुःसूत्र्याः अध्ययनं भारतीयवेदान्तदर्शनपरम्प– रायाः परिचयं ददाति ।

SKT-SC-403-C-2 चतुःसूत्र्योपरि शाङ्करभाष्यस्य पङ्क्तिव्याख्या ब्रह्मजिज्ञासायाः ब्रह्मणः तटस्थलक्षणारय शास्त्राप्रमाणकस्य च विषयाणां स्वरूपं उद्घाटयति ।

SKT-SC-403-C-3 धर्मराजाध्वरीन्द्र–विरचित–वेदान्तपरिभाषा अद्वैतवेदान्तदर्शनस्य प्रमाणमीमांसाम् उद्घाटयति, तस्य प्रत्यक्षखण्डस्य अध्ययनं वेदन्ताभिमतप्रमाणपरिचयसहितम् नव्यन्यायशैल्याः ज्ञानमपि ददाति ।

SKT-SC-403-C-4 वेदान्तपरिभाषायाः प्रत्यक्षखण्डः प्रमालक्षणम्, प्रत्यक्षलक्षणम्, प्रत्यक्षस्य प्रयोजकान् इत्यादिविषयान् प्रतिपादयति ।

## COURSE CODE : SKT- SC-404-C

## एकोनविंशं पत्रम् : अद्वैतशैवागमः (काश्मीरशैवदर्शनम्) पूर्णाद्वैतदर्शनञ्च

**Paper- XIX : Advaitashaivagamah (Kashmirashaivadarshanam) Purnadvaitadarshanancha**

SKT-SC-404-C-1 राजानकानन्दवृत्तिसहितः षट्त्रिन्शततत्त्वसन्दोहः ग्रन्थः अद्वैतशैवदर्शनस्य तत्त्वमीमांसायाः सृष्टिप्रक्रियायाः च परिचयं ददाति ।

SKT-SC-404-C-2 षट्त्रिन्शततत्त्वसन्दोहग्रन्थस्य कारिकानां सप्रसंगव्याख्या सूक्ष्माध्ययनार्थं प्रदीयते ।

SKT-SC-404-C-3 अरविन्दोपनिषदः पाठ्यक्रमे समावेशः पूर्णाद्वैतदर्शनस्य परिचयार्थं कृतः ।

SKT-SC-404-C-4 अरविन्दोपनिषदः पङ्क्तिव्याख्या वस्तुनिष्ठलेखन- कौशलं वर्धयति ।

## COURSE CODE : SKT- SC-405-C

## विंशं पत्रम् : दार्शनिकसिद्धान्ताः आधुनिकविज्ञानञ्च

**Paper- XX : Darshanikasiddhantah Adhunikavijnanancha**

SKT-SC-405-C-1 सर्वेषां प्राचीनभारतीयदर्शनानां प्रमुखसिद्धान्ताः तुलनात्मकाध्ययनार्थं समायोजिताः ।

SKT-SC-405-C-2 भारतीयदार्शनिकसंप्रदायानां प्रमुखसिद्धान्तानां ज्ञानम् प्राप्यते।

SKT-SC-405-C-3 भारतीयदर्शनस्य केषांचित् विषयाणां आधुनिकविज्ञानेन सह संबन्धः साधर्म्यं वा परीक्ष्यते ।

SKT-SC-405-C-4 सृष्टि-पर्यावरण-शरीर-यज्ञादिविज्ञानानाम् भारतीयदर्शनालोके अध्ययनं क्रियते ।

## COURSE CODE : SKT- SC-402-D

## सप्तदशं पत्रम् : नाट्यशास्त्रम्

**Paper- XVII : Natyashastram**

Co. 402-D- I : अस्मिन् घटके छात्राः पारिभाषिकनाट्यशब्दावलीमथ च सिद्धान्तानभिजानन्ति । सिद्धान्तसम्बद्धां व्याख्यां समधिगच्छन्ति ।

Co. 402-D- II : अत्र टिप्पण्यात्मकान् प्रश्नान् संस्कृतमाध्यमेनावगच्छन्ति ।

Co. 402-D- III : अस्मिन् घटके कारिकाणां व्याख्यां प्रश्नानां साधनञ्च जानन्ति।

Co. 402-D-IV : अत्र नाट्यशास्त्रस्य निर्धारितानामाचार्याणां योगदानेन छात्राः सुपरिचिताः भवन्ति ।

**COURSE CODE : SKT- SC-403-D**

**अष्टादशं पत्रम् : काव्यशास्त्रम् (2)**

**Paper- XVIII : Kavyashastram (2)**

Co. 403-D- I : अस्मिन् घटके छात्राः काव्यदोषैः सम्यक्परिचिताः भवन्ति तत्सम्बद्धां कारिकाव्याख्यां प्रश्नसाधनञ्च जानन्ति ।

Co. 403-D- II : अस्मिन् घटके छात्राः गुणानां वैशिष्ट्यं प्रश्नसाधनञ्च सम्यगवगच्छन्ति ।

Co. 403-D- III : घटकेऽस्मिन् निर्धारितानामलङ्काराणां लक्षणोदाहरणस्पष्टीकरण- रूपैः परिचिताः भवन्ति ।

Co. 403-D-IV : अत्र ध्वन्यालोकस्य लोचनसहितां व्याख्यां छात्राः समधिगच्छन्ति । ध्वनेः खण्डन–मण्डनपरम्परामपि जानन्ति ।

**COURSE CODE : SKT- SC-404-D**

**एकोनविंशं पत्रम् : चम्पूकाव्यं काव्यादर्शश्च**

**Paper- XIX : Champukavyam Kavyadarshashcha**

Co. 404-D- I : घटकेऽस्मिन् चम्पूकाव्यस्य परिचयपूर्वकं व्युत्पत्तिपरां ग्रन्थसम्बद्धां श्लोकव्याख्यां छात्राः समधिगच्छन्ति ।

Co. 404-D- II : अत्र चम्पूकाव्ये गद्यांशानां व्याख्यां विद्यार्थिनः अर्थद्वयेन सम्यगवच्छन्ति ।

Co. 404-D- III : अत्र नलचम्पूकाव्यस्य प्रथमोच्छ्वासमालोचनात्मकत्वेन विद्यार्थिनः विज्ञातारः भवन्ति ।

Co. 404-D- IV : घटकेऽस्मिन् छात्राः दण्डिनः काव्यादर्शे समागतैः काव्य-गद्य-कथा-आख्यायिकालक्षणैः सम्यक्परिचिताः जायन्ते ।

## COURSE CODE : SKT- SC-405-D

## विंशं पत्रम् : आधुनिककाव्यं गीतिकाव्यं च

**Paper- XX : Adhunikakavyam Gitikavyam Cha**

Co. 405-D-I : घटकेऽस्मिन् छात्राः नाट्के व्युत्पत्तिपरां व्याख्यां समधिगच्छन्ति।

Co. 405-D- II : अत्र नाटके समागतानां सूक्तीनां सोद्धरणां व्याख्यां जानन्ति।

Co. 405-D- III : अस्मिन् घटके छात्राः नाटकसम्बद्धान् आलोचनात्मकान् प्रश्नान् सम्यगभिजानन्ति ।

Co. 405-D-IV : अस्मिन् घटके छात्राः मेघदूताभिधस्य खण्डकाव्यस्य संस्कृत- व्याख्यया उदबुद्धाः जायन्ते ।

## COURSE CODE : SKT- SC-402-E

## सप्तदशं पत्रम् : शैवागमः

**Paper-XVII : Śaivāgamaḥ**

SKT-SC-402-E-1 कौण्डिन्यकृतभष्यालोकेन पाशुपतसूत्राणाम् आद्यः अध्यायद्वयस्य अध्ययनं शैवदर्शनस्य प्राचीनतमपरंपराम् योगविधिं च प्रदर्शयति।

SKT-SC-402-E-2 पाशुपतसूत्रस्य तृतीयतः पञ्चमाध्यायपर्यन्तं अध्ययनं पाशुपत-धर्मस्य, कर्तव्याकर्तव्ययोः सिद्धयोगिनः, कैवल्यस्य, भगवतः नामधेयानाम् इत्यादीनां ज्ञानं ददाति।

SKT-SC-402-E-3 वसुगुप्तविरचित-शिवसूत्रे प्रथम-द्वितीय-अध्याययोः शिव-शक्त्योः स्वरूपं, शाम्भव-शाक्तोपायानां च प्रतिपादनम् अस्ति ।

SKT-SC-402-E-4 वसुगुप्तविरचित-शिवसूत्रे तृतीयाध्याये आणवोपायानां कैवल्यस्य च वर्णनम् अस्ति यस्य अध्ययनेन प्राचीनशैवपरम्परायाः ज्ञानं प्राप्यते।

## COURSE CODE : SKT- SC-403-E
## अष्टादशं पत्रम् : तन्त्र-स्पन्दशास्त्रम्
### Paper-XVIII : Tantra-spandaśāstram

SKT-SC-403-E-1 विज्ञानभैरवतन्त्रस्य अध्ययनेन योगस्य धारणानां स्वरूपं ज्ञायते ।

SKT-SC-403-E-2 विज्ञानभैरवतन्त्रस्य पङ्क्तिव्याख्या विषयस्य सूक्ष्म-अध्ययनार्थं प्रेरयति ।

SKT-SC-403-E-3 स्पन्दकारिका शैवदर्शनस्य तन्त्रपरंपरायाः महत्त्वपूर्णः ग्रन्थः अस्ति येन स्पन्दस्य, महामुद्रायाः च ज्ञानं प्राप्यते ।

SKT-SC-403-E-4 स्पन्दकारिकायाः कारिकाव्याख्या वस्तुनिष्ठलेखन-कौशलं वर्धयति ।

## COURSE CODE : SKT- SC-404-E
## एकोनविंशं पत्रम् : शैववैष्णवतन्त्रम्
### Paper-XIX : Śaivavaiṣṇavatantram

SKT-SC-404-E-1 मालिनीविजयोत्तरतन्त्रं ग्रन्थः अद्वैतशैवदर्शनस्य त्रिकपरंपरायाः परिचयं ददाति ।

SKT-SC-404-E-2 लक्ष्मीतन्त्रं पाञ्चरात्र-वैष्णव-संप्रदायस्य ग्रन्थः अस्ति यत्र देवीलक्ष्म्याः उपासना विद्यते।

SKT-SC-404-E-3 तन्त्रसारः भारतीयतन्त्रपरंपरायाः शैवदर्शनस्य महत्त्वपूर्णः ग्रन्थः अस्ति ।

SKT-SC-404-E-4 तन्त्रसारस्य सप्रसंगपङ्व्याख्या वस्तुनिष्ठलेखन-कौशलं वर्धयति ।

## COURSE CODE : SKT- SC-405-E
## विंशं पत्रम् : शाक्तस्तोत्रम्
### Paper-XX : Śāktastotram

SKT-SC-405-E-1 ललितास्तवरत्नं इत्यस्मिन् ग्रन्थे ललितादेव्याः स्तुति विद्यते।

SKT-SC-404-E-2 ललितास्तवरतंत्रग्रन्थस्य अध्ययनेन स्तुतिग्रन्थानां परिचयः प्राप्यते ।

SKT-SC-404-E-3 पञ्चस्तवी इत्यस्मिन् ग्रन्थे पञ्चसूक्तेषु त्रिपुरादेव्याः स्तुति विद्यते ।

SKT-SC-404-E-4 पञ्चस्तवीग्रन्थस्य अध्ययनेन कुन्डलिनीयोगस्य परिचयः प्राप्यते ।